# संस्कृत-वार्ता:

दिनाङ्क : 20/11/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- जनतादल (युनाईटेड) दलस्य प्रमुखः नितीशकुमारः अद्य प्रातः दशमं बारं बिहारस्य मुख्यमन्त्रीरूपेण शपथग्रहणं कृतवान्।
- सर्वोच्चन्यायालयेन अद्य निर्णयः प्रदत्तः यत् विधेयकेषु अनुमतिं प्रदातुं राष्ट्रपति-राज्यपालयोः निर्णये न्यायालयः कस्यापि समयसीमायाः निर्धारणं न कर्तुं शक्नोति।
- प्रवर्तन-निर्देशालयेन, ब्रिटेन-देशस्य शस्त्र-परामर्शदेन सञ्जय भंडारी इत्यनेन सह सम्बद्धस्य धनशोधन-प्रकरणे व्यापारिणः राबर्ट् वाड्रा इत्यस्य विरुद्धं आरोपपत्रं पंजीकृतम् ।
- भारतेन चतुर्विंशत्यधिक द्विसहस्र पञ्चविंशत्यधिक द्विसहस्र तम वर्षे चतुःपञ्चाशत्सहस्राधिक-एकलक्ष-कोटिरूप्यकाणां रक्षोत्पादनम् अभिलिखितम्।
- भारतस्य अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवस्य पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य षट्पञ्चाशत्तमं संस्करणम्, अद्य गोवानगरे समारब्धम्।
- ग्रेटर नोएडायाम् आयोजिते विश्व मुष्टामुष्टी चषक स्पर्धाया: निर्णायक द्वन्द्वे भारतीय मुष्टा मुष्टी क्रीडिका: चत्वारि स्वर्णपदकानि समर्जितानि।

---

<u>नितीशकुमार:- शपथग्रहणम्</u>

जनतादल (युनाईटेड) दलस्य प्रमुखः नितीशकुमारः अद्य प्रातः दशमं बारं बिहारस्य मुख्यमन्त्रीरूपेण शपथग्रहणं कृतवान्।

बिहारस्य राज्यपालः आरिफ-मोहम्मद-खानः नितीशकुमारं पदस्य गोपनीयतायाः च शपथग्रहणं कारितवान्। शपथग्रहण-समारोहः पटना-नगरस्य ऐतिहासिके-गान्धी-मैदान-क्षेत्रे अभवत्। अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी, केन्द्रीयमन्त्री अमितशाहः, जे. पी. नड्डा, चिराग पासवानः एन. डी. ए-दलस्य अन्येपि नैके प्रमुखाः नेतारः उपस्थिताः आसन्। नूतने बिहार-सर्वकारे मुख्यमन्त्रिणा नितीश-कुमारेन सह आहत्य सप्तविंशति मन्त्रिणः अपि मन्त्रीपदस्य शपथ-

ग्रहणं कृतवन्तः। सम्राट् चौधरी, विजयकुमारसिन्हा, दिलीप जायसवालः, मङ्गलपाण्डे, नितिननबीनः, रामकृपालयादवं च समेत्य नैके भाजपेति दलस्य नेतारः नितीश-कुमारस्य मन्त्रिमण्डले मन्त्रीरूपेण शपथं स्वीकृतवन्तः। जनतादल (यू) दलस्य लेशीसिंहः, श्रवणकुमारः, बिजेन्द्रप्रसादयादवः, ज़मा खानः, अशोकचौधरी च मन्त्रीरूपेण शपथग्रहणं स्वीकृतवन्तः । अवधेयं यत् सद्यैव आयोजिते बिहार्-विधानसभायाः निर्वाचने एन्. डी. ए. दलेन द्वयाधिक द्विशतं आसनानि प्राप्य विजयं प्राप्तम्। एन्. डी. ए. घटबन्धने भाजपेति दलेन ऊननवति विधानसभासनानि, जे. डी. (यू) दलेन पञ्चाशीति विधानसभासनानि, एल. जे. पी. रामविलास दलेन ऊनविंशति विधानसभासनानि, हिन्दुस्तानी-आवाम्-मोर्चा दलेन पञ्चविधानसभासनानि, राष्ट्रिय-लोक-मोर्चा दलेन चत्वारि-विधानसभासनानि च प्राप्य विजयं प्राप्तम्। विपक्षस्य महाघटबन्धनेन निर्वाचने केवलं पञ्चत्रिंशत् विधानसभासनानि एव समर्जितानि।

---

## प्रधानमन्त्री-नितीश:

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य बिहार्-राज्यस्य मुख्यमन्त्रीरूपेण शपथग्रहणार्थं नितीशकुमारम् अभिनन्दितम्। सामाजिकान्तर्जालीय सन्देशे, प्रधानमन्त्री अवदत् यत्, श्री-कुमारः एकः अनुभवयुतः प्रशासकः अस्ति तथा च नूतन-कार्यकालस्य सफलतायाः कामनाम् अकरोत्। सः सम्राट् चौधरी तथा विजय कुमार सिन्हा इत्येतौ उप-मुख्यमन्त्रिणौ अपि अभिनन्दितवान्। श्रीमोदी, बिहार-सर्वकारस्य नव-नियुक्तेभ्यः मन्त्रिभ्यः अपि शुभाशयाः प्रदत्तवान्, एतत् दलं राज्यं नूतन-औन्नत्यं प्रति नेतुं सज्जं समर्थं समर्पितं च अस्तीति उक्तवान्।

---

## सर्वोच्चन्यायालय:

सर्वोच्चन्यायालयेन अद्य निर्णयः प्रदत्तः यत् संविधानस्य अनुच्छेदः द्विशतं/एकोत्तर द्विशतं इत्येतयोः अन्तर्गतं विधेयकेषु अनुमतिं प्रदातुं राष्ट्रपति-राज्यपालयोः निर्णये न्यायालयः कस्यापि समयसीमायाः निर्धारणं न कर्तुं शक्नोति इति। मुख्यन्यायाधीशस्य बी. आर्. गवायि वर्यस्य नेतृत्वे पञ्च-न्यायाधीशानाम् संविधानपीठेन सर्वसम्मत्या अभिनिर्नितम्।

---

## प्रवर्तन-निदेशालय:- वाड्रा

प्रवर्तन-निदेशालयेन, ब्रिटेन-देशस्य शस्त्र-परामर्शदेन सञ्जय-भंडारी इत्यनेन सह सम्बद्धस्य धनशोधन-प्रकरणे व्यापारिणः राबर्ट्-वाड्रा इत्यस्य विरुद्धं आरोपपत्रं पंजीकृतम् अस्ति। आधिकारिकस्रोतानां अनुसारं, अभियोजनपक्षस्य परिवादः धनशोधन-निवारण-अधिनियमस्य विशेषन्यायालयस्य समक्षं प्रदत्तः अस्ति। वाड्रा इत्यस्य विरुद्धं एतत् द्वितीयं धनशोधनस्य आरोपपत्रं वर्तते।

---

## रक्षा-उत्पादनम्

भारतेन चतुर्विंशत्यधिक-द्विसहस्र, पञ्चविंशत्यधिक-द्विसहस्रतम वर्षे चतुःपञ्चाशत्सहस्राधिक-एकलक्ष-कोटिरूप्यकाणां रक्षोत्पादनम् अभिलिखितम्। रक्षा-निर्यातः अपि चतुर्विंशत्यधिक-द्विसहस्र, पञ्चविंशत्यधिक-द्विसहस्रतम वर्षे द्वाविंशत्यधिक-षट्शतोत्तर-त्रयोविंशति-सहस्र-कोटिरूप्यकाणि अभिलिखितम्, यत् चतुर्दशाधिक-द्विसहस्रतमे वर्षे सहस्रकोटिरूप्यकाणि यावत् न्यूनम् आसीत्।

---

## मन की बात-कार्यक्रम:

प्रधानमन्त्री नरेन्द्रमोदी नवंबर मासस्य त्रिंशत् दिनाङ्के स्वीये 'मन की बात' इत्येतस्मिन् कार्यक्रमे देशविदेशयो: जनै: साकं विचार-विनिमयं करिष्यति। 'मन की बात' इत्यस्य मासिक-कार्यक्रमस्य इदं अष्टविंशत्यधिकैकशततमं संस्करणं भविष्यति। जना: निजविचारान् माईगोव-नरेन्द्रमोदी-चलदूरभाषीय तन्त्राशयो: प्रेषितुं शक्नुवन्ति।

-----------------------------------------

## प्रधानमन्त्री-दक्षिण-अफ़्रिका

प्रधानमन्त्री नरेन्द्रमोदी सोमवासरे जोहान्स्बर्ग्-नगरे जी-विंशति शिखरसम्मेलने भागं ग्रहणाय दक्षिण-अफ़्रिका-देशस्य त्रि-दिवसीययात्रायां भविष्यति। अद्य नवदिल्ल्यां वार्ताहरान् सम्बोधयन् विदेशमन्त्रालयस्य (आर्थिकसम्बन्धस्य) सचिवः सुधाकर दलेला इत्येषः अवदत् यत् षोडशाधिक-द्विसहस्रतमे वर्षे द्वैपाक्षिकयात्रायाः अनन्तरम् अष्टादशाधिक-द्विसहस्रतमे वर्षे त्रयोविंशत्यधिक द्विसहस्रतमे वर्षे च ब्रिक्स्-शिखरसम्मेलने भाग-ग्रहणानन्तरं दक्षिण-अफ़्रिकादेशं प्रति प्रधानमन्त्रिणः एतत् चतुर्थम् आधिकारिक यात्रा भविष्यति। श्रीदलेला अवदत् यत् एतत् प्रथमं जी-विंशति शिखरसम्मेलनम् अस्ति यत् अफ्रिकायाः भूमौ भविष्यति तथा च तस्मिन् सन्दर्भे अफ्रिका-देशस्य विकासस्य विषयेषु चर्चा भविष्यति। सः अवदत् यत् जी-विंशति शिखरसम्मेलनानन्तरं, प्रधानमन्त्री भारत-ब्राज़िल्-दक्षिण-अफ़्रिका (आई. बी. एस्. ए.) नेतृणाम् उपवेशने अपि भागं ग्रहीष्यति।

-----------------------------------------

## राष्ट्रपति-जनजातीय-गौरव-दिवस:

राष्ट्रपतिः द्रौपदी मुर्मुः वर्या उक्तवती यत् जनजातीयसमुदायानां विकासः राष्ट्रस्य विकासः च परस्परं पूरकौ स्तः। जनजातीय-गौरव-दिवसस्य अवसरे अद्य छत्तीसगढस्य अम्बिकापुरे आयोजिते कार्यक्रमे सम्बोधयन्ती राष्ट्रपतिः अवदत् यत् जनजातीय-समुदायानां योगदानं भारतस्य इतिहासे गौरवपूर्णं अध्यायं कल्पयति। सा उक्तवती यत् जनजातीय-संस्कृतिः अस्माकं परम्परा परिचयः च अस्ति, यस्य संरक्षणम् अस्माकं कर्तव्यम् अस्ति।

-----------------------------------------

## अन्ताराष्ट्रिय-चलच्चित्र-महोत्सव:

भारतस्य अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवस्य पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य षट्पञ्चाशत्तमं संस्करणम्, अद्य गोवानगरे समारब्धम्। चलच्चित्रस्य अष्टदिवसीयः महोत्सव: अस्य मासस्य अष्टाविंशति दिनाङ्कपर्यन्तं प्रचलति। उद्घाटनसमारोहे, सूचना-प्रसारण-राज्यमन्त्री डा. एल्.

मुरुगनः, गोवाराज्यस्य मुख्यमन्त्री प्रमोद सावन्तः, सूचना-प्रसारण-सचिवः सञ्जय जाजुः, महोत्सव-निर्देशकः शेखरकपूरः, अभिनेतारः नन्दमुरी बालकृष्णः, अनुपम खेरः, मनोजजोशी, श्रीलीला, चलच्चित्रनिर्माता राकेश ओम प्रकाश मेह्‌रा च उपस्थिताः आसन्।

---

**गोल्फ -क्रीडा**

भारतीय गोल्फ-क्रीडिका दीक्षाडागरः इत्यनया अद्य टोक्यो-नगरे आयोजिते डेफलिंपिक्स स्पर्धायाः अन्तिमचक्रे विजयानन्तरं स्वर्णपदकं विजितम्।

---

**विश्व-मुष्टामुष्टी -चषकः**

ग्रेटर-नोएडायाम् आयोजिते विश्व-मुष्टामुष्टी-चषक-स्पर्धायाः निर्णायक-द्वन्द्वे भारतीय-मुष्टामुष्टी क्रीडिकाः चत्वारि स्वर्णपदकानि समर्जितानि।

।। इति वार्ताः ।।